श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्रीरङ्गनाथस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीरङ्गनाथस्तोत्रम् ॥

नमः श्रीरङ्गनाथाय नमः श्रीरङ्गशायिने।
नमः श्रीरङ्गदेवाय श्रीनिवासाय ते नमः॥ १ ॥

नमो भगवते तुभ्यं वासुदेवाय ते नमः।
सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय ते नमः॥ २ ॥

पुरुषाय नमस्तुभ्यं अच्युताय पराय च।
वासुदेवाय ताराय नमः श्रीरङ्गशायिने॥ ३ ॥

केशवाय नमस्तेऽस्तु नमो नारायणाय च।
माधवाय नमस्तुभ्यं गोविन्दाय च ते नमः॥ ४ ॥

ओं नमो विष्णवे देव मधुसूदन ते नमः।
त्रिविक्रम नमस्तेऽस्तु नमस्ते वामनाय च॥ ५ ॥

श्रीधराय नमस्तुभ्यं हृषीकेश नमोऽस्तु ते।
नमोऽस्तु पद्मनाभाय नमो दामोदराय च॥ ६ ॥

मत्स्यकूर्मवराहाय हंसाश्वशिरसे नमः।
नमोऽस्तु जामदग्न्याय दत्ताय कपिलाय च॥ ७ ॥

वेदव्यासाय बुद्धाय नृसिंहाय ते नमः।
रामलक्ष्मणशत्रुघ्न भरतात्मन् नमोऽस्तु ते॥ ८ ॥

कृष्णाय बलभद्राय नमस्सांभाय कल्किने।
अनन्तानन्दशयने पुराण पुरुषोत्तम।
रङ्गनाथ जगन्नाथ नाथ तुभ्यं नमो नमः॥ ९ ॥

॥ इति श्रीरङ्गनाथस्तोत्रं संपूर्णम् ॥

www.prapatti.com